श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीनृसिंहो महासिंहो दिव्यसिंहो महाबलः।
उग्रसिंहो महादेव उपेन्द्रश्चाग्निलोचनः॥ 1 ॥

रौद्रश्शौरिर्महावीरस्सुविक्रमपराक्रमः।
हरिकोलाहलश्चक्री विजयश्चाजयोऽव्ययः॥ 2 ॥

दैत्यान्तकः परब्रह्माप्यघोरो घोरविक्रमः।
ज्वालामुखो ज्वालमाली महाज्वालो महाप्रभुः॥ 3 ॥

निटिलाक्षस्सहस्राक्षो दुर्निरीक्ष्यः प्रतापनः।
महादंष्ट्रायुधः प्राज्ञो हिरण्यकनिषूदनः॥ 4 ॥

चण्डकोपी सुरारिघ्नस्सदार्तिघ्नस्सदाशिवः।
गुणभद्रो महाभद्रो बलभद्रस्सुभद्रकः॥ 5 ॥

कराळो विकराळश्च गतायुस्सर्वकर्तृकः।
भैरवाडम्बरो दिव्यश्चागम्यस्सर्वशत्रुजित्॥ 6 ॥

अमोघास्त्रश्शस्त्रधरस्सव्यजूटस्सुरेश्वरः।
सहस्रबाहुर्वज्रनखस्सर्वसिद्धिर्जनार्दनः॥ 7 ॥

अनन्तो भगवान् स्थूलश्चागम्यश्च परावरः।
सर्वमन्त्रैकरूपश्च सर्वयन्त्रविदारणः॥ 8 ॥

अव्ययः परमानन्दः कालजित् खगवाहनः।
भक्तातिवत्सलोऽव्यक्तस्सुव्यक्तस्सुलभश्शुचिः॥ 9 ॥

लोकैकनायकस्सर्वश्शरणागतवत्सलः।
धीरो धरश्च सर्वज्ञो भीमो भीमपराक्रमः॥ **10** ॥

देवप्रियो नुतः पूज्यो भवहृत् परमेश्वरः।
श्रीवत्सवक्षाः श्रीवासो विभुस्सङ्कर्षणः प्रभुः॥ **11** ॥

त्रिविक्रमस्त्रिलोकात्मा कालस्सर्वेश्वरेश्वरः।
विश्वंभरः स्थिराभार्यश्चाच्युतः पुरुषोत्तमः॥ **12** ॥

अधोक्षजोऽक्षयस्सेव्यो वनमाली प्रकम्पनः।
गुरुर्लोकगुरुस्स्रष्टा परं ज्योतिः परायणः॥ **13** ॥

ज्वालाहोबिलमालोलक्रोडाकारञ्जभार्गवाः।
योगानन्दश्छत्रवटः पावनो नव मूर्तयः॥ **14** ॥

॥ इति श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥